सकाशादिति कल्पतर्वादौ पाठः । अध्यग्न्यादिशब्दास्तु योगरूढ़ास्तादृशस्त्रीधनादावेव प्रयोगात् । गृहोपस्कर-वाद्यानां यन्मूल्यं कन्यापण्योपाधित्वेन वरादिभ्यः कन्या-भरणरूपेण गृह्यते तच्छुल्कमिति मदनरत्ने व्याख्या-तम् । मिताक्षरायां तु यद्गृहीत्वा कन्या दीयते तच्छुल्कमित्युक्तम् । उभयत्रापि पित्रादीनां कन्याया इदमित्युद्देशो विवक्षितः अन्यथा तत्स्वत्वाभावेन स्त्रीधनत्वव्यपदेशत्वानुपपत्तेः । जीमूतवाहनेन तु कार्म्म-णामिति पठित्वा गृहादिकर्म्मभिः शिल्पिभिस्तत्कर्म्म-करणे भर्त्रादिप्रेरणार्थं स्त्रियै यदुत्कोचदानं तच्छु-ल्कं तदेव मूल्यं प्रकृत्यर्थत्वादिति व्याख्यातम् । पुनश्चोक्तम् "यदानीतं भर्तृगृहे शुल्कन्तत्परिकीर्त्ति-तमिति" व्यासोक्तं वा । भर्तृगृहगमनार्थमुत्कोचादि यद्दत्तं तच्छुल्कमित्यर्थ इति । तदुभयमपि स्त्री-स्वामिकं भवत्येव तस्या एव दत्तत्वादिति तत्र स्त्री-धनत्वव्यपदेशोऽन्यस्त्रीधनवत् सुगम एव । आधि-वेदनिकं त्वन्तरविवाहकाले पूर्व्वभार्य्यायै यद्दीयते । यदाह याज्ञवल्क्यः "अधिविन्नस्त्रियै दद्यादाधि-वेदनिकं समम् । न दत्तं स्त्रीधनं यासां दत्ते त्वर्द्धं प्रकल्पयेत्" इति । पित्रादिभिर्जीवनार्थं स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः "पितृमातृपति-भ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै । यथाशक्त्या द्विसा-हस्राद्दातव्यं स्थावरादृते" । स्थावरेतरधनं यथाशक्ति आकार्षापणसहस्रद्वयपर्य्यन्तं देयमित्यर्थः । व्यासोऽपि "द्विसहस्रः परो दायः स्त्रियै देयो धनस्य तु" । आद्वि-सहस्रादिति कात्यायनेन, पर इति च व्यासेनोक्ते-रितोऽधिकमिति धनिनापि न स्त्रीभ्यो देयमिति दर्शितम् । अयञ्च नियमः प्रतिवत्सरमसकृदर्पणे चैकस्मि-न्नानेकवत्सरेषु जीवनार्थं दीयमानमितोऽधिकमपि भवति चेन्न दोषः । जीवनार्थत्वाद्दानस्य यावज्जीवन्तु द्विसाहस्रमात्रेण तन्निर्व्वाहासम्भवात् । स्त्रीधनेऽपि भर्त्रनुमतिमन्तरेण स्त्रीणान्न स्वातन्त्र्यमित्याह मनुः "न निर्हारं स्त्रियः कुर्य्युः कुटुम्बाद्बहुमध्यगात् । स्वकादपि च वित्ताद्धि स्वस्य भर्त्तुरनाज्ञया" इति निर्हारो व्ययः । क्वचित्तु स्त्रीधने तासां स्वातन्त्र्य-मस्ति यदाह सौदायिकस्वरूपमुक्त्वा कात्यायनः "सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते । यस्मात्तदानृशंस्यार्थं तैर्दत्तमुपजीवनम् । सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम् । विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि" । भर्तृदत्ते तु स्थाव-रेतरत्रैव स्वातन्त्र्यमित्याह नारदः "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत् । सा यथा काम-मश्नीयाद्दद्याद्वा स्थावरादृते" । स्थावरे भर्तृदत्ते स्त्रिया निवासाद्युपभोगमात्रं न दानविक्रयादिकमित्यर्थः । अपुत्रा शयनं भर्त्तुरित्यादि कात्यायनवचोऽपि भर्तृ-दत्तस्थावरविषयमेव नारदैकवाक्यतयेति केचित् । अस्माभिस्तु पत्नी दुहितर इति व्याख्यानावसरेऽस्य विषयः प्रपञ्चितः । पुरुषाणामपि कस्यचिदपि स्त्रीधने न स्वातन्त्र्यं स्वाम्याभावादित्याह कात्यायनः "न भर्त्ता नैव च सुतो न पिता भ्रातरो न च । आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः । यदि त्वेकतरो-ऽप्येषां स्त्रीधनं भक्षयेद्बलात् । सवृद्धिकं स दाप्यः स्याद्दण्डञ्चैव समाप्नुयात् । तदेव यद्यनुज्ञाप्य भक्षयेत् प्रीतिपूर्व्वकम् । मूल्यमेव तदा दाप्यो यदा स धनवान् भवेत् । अथ चेत् स द्विभार्य्यः स्यान्न च तां भजते पुनः । प्रीत्या विसृष्टमपि चेत् प्रतिदाप्यः स तद्बलात् । ग्रासाच्छादनवासानामुच्छेदो यत्र योषितः । तत्र स्वमा-ददीत स्त्री विभागं रिक्थिनान्तथा" । स्त्रिया धनं गृहीत्वा यद्यपरभार्य्यया सह वसत्येनाञ्चावमन्यते तदा गृहीतं तद्धनं राज्ञा बलाद्दाप्यः । भक्ताच्छा-दननिवासान् यदि भर्त्ता न ददाति तदा तेऽपि स्त्रिया बलादुपाहर्त्तव्यानि धनं वा ग्राह्यमिति श्लोकद्वयस्यार्थः । इदमपि तस्या दोषराहित्ये बोध्यं दुष्टा पुनः किमपि स्त्रीधनं न लभते इत्याह स एव "अपकारक्रियायुक्ता निर्लज्जा चार्थना-शिका । व्यभिचाररता या च स्त्रीधनं न तु सा-र्हति" । नार्हतीत्यनेन तया लब्धमप्याच्छिद्य ग्राह्य-मिति सूचितम् । अपकारक्रियायुक्ता सदा भर्तृप्रतिकूला-चरणपरा "निर्म्मर्य्यादार्थनाशिका" इत्यपि पाठः । देवलः "वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत् । भोक्त्री तत् स्वयमेवेदं पतिर्नार्हत्यनापदि । वृथा मोक्षे च भोगे च स्त्रियै दद्यात् सवृद्धिकम्" इति । वृत्ति-र्जीवनार्थं पित्रादिना दत्तमिति स्मृतिचन्द्रिकायाम् । मदनरत्ने तु वृत्तिरिति पठितम् । वृत्तिर्जीवनार्थं पित्रादिभिर्दत्तमिति व्याख्यातञ्च । लाभो मैत्र्यादि-प्रीत्यर्थं यल्लभ्यते कुतश्चित् । वृथा आपदमन्तरेण ।